# Shri Mahashasta Ashtakam

# શ્રીમહાશાસ્તાષ્ટકમ્

## Document Information

Text title : Mahashasta Ashtakam

File name : mahAshAstAShTakam.itx

Category : deities_misc, ayyappa, aShTaka

Location : doc_deities_misc

Proofread by : Mohan Chettoor

Latest update : October 11, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

Shri Mahashasta Ashtakam

# શ્રીમહાશાસ્તાષ્ટકમ્

ગજેન્દ્રશાર્દૂલ મૃગેન્દ્રવાહનં
  મુનીન્દ્રસંસેવિત પાદપઙ્કજમ્ ।
દેવીદ્વયેનાવૃત પાર્શ્વયુગ્મં
  શાસ્તારમાદ્યં સતતં નમામિ ॥ ૧॥

હરિહરભવમેકં સચ્ચિદાનન્દરૂપં
  ભવભયહરપાદં ભાવનાગમ્યમૂર્તિમ્ ।
સકલભુવનહેતું સત્યધર્માનુકૂલં
  શ્રિતજનકુલપાલં ધર્મશાસ્તારમીડે ॥ ૨॥

હરિહરસુતમીશં વીરવર્યં સુરેશં
  કલિયુગભવભીતિધ્વંસલીલાવતારમ્ ।
જયવિજયલક્ષ્મી સુસંસૃતાજાનુબાહું
  મલયગિરિનિવાસં ધર્મશાસ્તારમીડે ॥ ૩॥

પરશિવમયમીડ્યં ભૂતનાથં મુનીન્દ્રં
  કરધૃતવિકચાબ્જં બ્રહ્મપઞ્ચસ્વરૂપમ્ ।
મણિમયસુકિરીટં મલ્લિકાપુષ્પહારં
  વરવિતરણશીલં ધર્મશાસ્તારમીડે ॥ ૪॥

હરિહરમયમાય બિમ્બમાદિત્યકોટિ
  ત્વિષમમલમુખેન્દું સત્યસન્ધં વરેણ્યમ્ ।
ઉપનિષદવિભાવ્યં ઓંઇતિધ્યાનગમ્યં
  મુનિજનહૃદિ ચિન્ત્યં ધર્મશાસ્તારમીડે ॥ ૫॥

કનકમય દુકૂલં ચન્દનાર્દ્રાવસિક્તં
  સરસમૃદુલહાસં બ્રાહ્મણાનન્દકારમ્ ।
મધુરસમયપાણિં મારજીવાતુલીલં
  સકલદુરિતનાશં ધર્મશાસ્તારમીડે ॥ ૬॥

મુનિજનગણસેવ્યં મુક્તિસામ્રાજ્યમૂલં
   વિદિતસકલતત્વજ્ઞાનમન્ત્રોપદેશમ્ ।
ઇહપરફલહેતું તારકં બ્રહ્મસંજ્ઞં
   ષડરિમલવિનાશં ધર્મશાસ્તારમીડે ॥ ૭॥

મધુરસફલમુખ્યૈઃ પાયસૈર્ભક્ષ્યજાલૈઃ
   દધિઘૃત પરિપૂર્ણૈરન્નદાનૈસ્સન્તુષ્ટમ્ ।
નિજપદનમિતાનાં નિત્યવાત્સલ્યભાવં
   હૃદયકમલમધ્યે ધર્મશાસ્તારમીડે ॥ ૮॥

ભવગુણજનિતાનાં ભોગમોક્ષાય નિત્યં
   હરિહરભવદેવસ્યાષ્ટકં સન્નિધૌ યઃ ।
પઠતિ સકલભોગાન્ મુક્તિસામ્રાજ્યભાગ્યે
   ભુવિદિવિ? ચ તસ્મૈ નિત્યતુષ્ટો દદાતિ ॥ ૯॥

ઇતિ શ્રીમહાશાસ્તાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Mohan Chettoor

*Shri Mahashasta Ashtakam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*